International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 301-303
© 2017
www.anantaajournal.com
Received: 18-05-2017
Accepted: 22-06-2017

**डॉ. पि. नीलकण्ठ**:
सहायकाचार्य:, शैवागम विभाग:, श्री वेंकटेश्वर वेद विश्वविद्यालय: तिरुपति:, आंध्र प्रदेश, भारत

Correspondence
**डॉ. पि. नीलकण्ठ**:
सहायकाचार्य:, शैवागम विभाग:, श्री वेंकटेश्वर वेद विश्वविद्यालय: तिरुपति:, आंध्र प्रदेश, भारत

# अमुद्रित अंशुमदागामे विशेषांश अनुशीलनम्

**डॉ. पि. नीलकण्ठ**:

**सारांश**
सिद्धान्त शैवागम: अविम्शतिधा वर्तन्ते | तेषु केचन ग्रन्थाःमुद्रिता: अपरे केचन अमुद्रिता: सन्ति | एतेषु सिद्धंत ग्रंथेषु लोकोपकारकाः अनेके अंशा: भवन्ति | अमुद्रितेषु ग्रंथेषु एकतमस्य अम्शुमदागमस्य परिशीलानेन ग्रन्थप्रतिष्ठा आस्थानमंडप लक्षणं,कोटि पद्मार्चन, पंचगोचर प्रतिष्ठा इत्यादय: अनेके अंशा: इतरत्र अविद्यमाना: वर्तन्ते तेषां अम्शानां विवरणम् अत्र क्रियते|

**कूटशब्द:** तालपत्राणि, उत्तम उत्तमम्, अधमधमम्, ग्रन्थप्रतिष्ठा, कोटिपद्मार्चन, राज्याधिपत्यं,चक्रवर्तित्वम्, आत्मार्थयजनं |

## प्रस्तावना

वेदतुल्याः आगमा: शिव निश्वास रूपा: वेदा:, तन्मुखोद्गीता: आगमाः, अतः तयो: समप्राधान्य विषये नकोपि संदेह: तादृश आगमाः तालपत्रेषु ग्रन्थाक्षरयाम् अधिकतया दृश्यन्ते पत्र लेखिन्याद्यभाव समये ऋष्यादिभिः शिष्यगणानाम् मौखिकतया बोथिता, तादृश शिष्यगणै: परम्पराप्राप्त तान् लिपि बध्यम् कर्तुम् प्रयत्नो जात: ।

मुद्रण सौकर्याद्यभावसमये भूर्जपत्रादीन्, तालपत्रान्, पत्राकारतयाकृत्वा घंटासहायेन लिपि बध्यम् कृतम् । परम्परा प्राप्त तान् दक्षिणदेशे अत्यधिक प्राचुर्यम् लब्ध शैव वैष्णव संप्रदाय शास्त्र ग्रन्थादयः सर्वेपि तत्र प्राचुर्यम् प्राप्त लिपिषु ग्रन्थाक्षरष्वेव शैवागमा: लिपि बध्धा: कृताः ।

ताळवृक्ष पत्रानानीय्य तान् शुद्धिम् कृत्वा पुस्तकतया निर्माण विषये पत्रनिर्माण विषयेच अंगुल संख्या निर्णीता दृश्यते तैः निर्माण पुस्तकानां सहस्राधिक वत्सरपर्यन्तम् स्थिरत्व सिद्धये तेषु देवता, शक्ति, रिश्यादीनाम् आवाहनम् तद्विधानन्च सविस्तृतथा अमुद्रित अंशुमदागमे दृश्यते । एतत् I.F.P संस्थायाम् TO 889 संख्याचिह्नितो आगमस्थापन विधि पटले -

अत्र ग्रामादि निर्माण प्रामाण कथन पूर्वकम्, पुस्तकम् तु षण्मान गणन पूर्वकम् निर्मातव्यमित्युक्तम्। यथा

श्लो- आयव्ययंत्र नक्षत्रम् योनि वाराम्श कानिच ।
एतत्सर्वं माख्यातम् शुभम् पुस्तक लक्षणाम् ।।

पुस्तक निर्माणविषये अंगुळ मानमेव स्वीकरणीय मित्य भिधाय तत्तु मानांगुळमिति च व्यवह्रियते

श्लोः- पुस्तकं च प्रदीपं च लेखन नाथ मेव च ।
अन्यैश्च हस्त मात्रेण मानांगुल्येन कारयेत् ।। इति

तालपत्र निर्माणं अंगुलीसंख्या भेदेन उत्तम, मध्यम, अधम भेदाः पुनः एकैकमपि त्रिविध भेदेन च नवविधतया तालपत्रपुस्तक निर्माणविधिः निरुत्पत्तिः । तेषां विशेष नामानिच दत्तानि तद्विवरणं दीयते :-

श्लो- द्वाविंशदंगुलं दीर्घं मानां गुल्येन कारयेत् ।
पुस्तकस्य तु विस्तारं चतुरंगुल मुच्यते ।।
एभिस्तु लक्षणैर्युक्तं लक्ष्मीनीद्गामितिस्मृतम् ।
इति उत्तमोत्तम तालपत्रलक्षणं मुक्तं ।।
चतुर्दशांगुलायामं अंगुलद्वय विस्तृतं. ।
एभिस्तुलक्षणै र्युक्तम् सर्वसंपत्करं' नृणाम् ।। इति
अधमाधमतालपत्र लक्षणम् अधिदेवतादयः
ब्रह्माविष्णुश्च रुद्रश्च ईश्वर: शिव मेवच ।
कालरुद्रो नीलरुद्रो प्रलयानिलस्सदाशिवः ।।
अधिदेवा समाख्यातः शक्तयश्चाधुनोच्यो ते ।
वामज्येष्ठादि पूर्वादि रौद्री चैवमनोन्मनी ।।
विश्वामित्र श्च वाल्मीक काश्यपश्चांगीरसस्तथा ।
गौतमालंभवो लाभा वशिष्ठश्चा शुनस्तथा ।
देवता शक्तयश्चैव ऋषय: कीर्तितः क्रमात् ।।
इत्थम् प्रमाणादिकम् वर्णितम् ।। इति

तादृश पुस्तक ग्रथनाय यव मात्र सुषिर निर्माणम्, भागत्रयमध्ये, चतुर्भाग मध्येवा रज्जुबन्धनाय कर्तव्यम्, तादृश राज्जु निर्माण विषयोपि कार्पासतंतुना कर्तव्यमिति तस्यापि उत्तम, मध्यम, अधम भेद प्रतिपादनम् एवम् विधनयाकृतम् 27 विम्शति सूत्रैर्युत रज्जु उत्तम, अष्टादश सूत्रैर्युत मध्यमम् नवसूत्रर्युत रज्जु अधममिति प्रतिपाद्य तत्रैव, घंटालक्षणम् लेखन विधानंच, उक्त्वा लिखित ग्रन्थस्य प्रतिष्ठापनाय चतुर्द्वारयुत यागशाला निर्माणं, योनिकुण्डकल्पनम्, मध्यवेदिकायां तत् पुस्तकम् संस्थाप्य तत्तदेवता, शक्ति, ऋष्यादि न्यासादिकम् कृत्वा प्रतिष्ठा तद्विधिविधानम् चोपपादितम् तथा तत्पुस्तकम् चिरकालम् सुस्थिरम् भवती, अतएव तादृश ग्रन्थाः अधुना अस्माभिः लभ्यते (तथापि शैवागम ग्रन्थाः संपूर्णतया पादचतुष्टय युताः नास्माभिरूप लभ्यन्त इति महान् भेदः) एतादृश आगमानाम् नागराक्षर लिप्यां मुद्रणाय I. F.P प्रत्येक विभाग स्थापनम् अनेक पण्डितैः, संघ्यैरपिच क्रियमाण प्रयत्नः संतोष कारकाएव । मुद्रितेषु आगमेषु अलब्ध प्रजोपकारक विषयाः अमुद्रितेषु तालपत्रग्रन्येषु दृष्यंते कांश्चित् परिशीलयामः ।

1. .I.F.P संस्थायाम् लभ्यमान TO 889 संख्या चिह्नित अंशुमदागमे स्थित "आस्थान मंडप पटलः मुद्रितेषु ग्रंथेषु न दृश्यते तन्निर्माण विषयः किन्तु लौकिकव्यवहारण लोके मुखतम आलयेषुर दृश्यते परम् तत्र देवालयस्य पंचप्राकार मध्येव, बाह्येवा, सर्वदिक्षु, उद्याने वा, रम्यदेशेवा, एकविम्शति करायतं, पंच, त्रि, एक पंक्ति युतं वा कार्यमिति प्रतिपादितं, तद्वदेव मकुटमण्डप, रङगमण्डप निर्माण विषयाः सुस्पष्टतया उक्ताः ।
2. पं.अभिषेक विधिपटले तत् प्रयोजनैः साकम् ब्रह्मकूर्चविधि तन् निर्माण विधि श्च उक्तम्
3. कोटि बिल्वार्चन, लक्षबिल्वार्चनादिकं लोके प्रसिद्धमेव किंतु अत्र कोटि पद्मार्चना विधि तत्फलं, संख्याविशेषेण फल भेदंच दृश्यते

a. सहस्र पद्मार्चनेन रज्याधिपत्यं
b. दशसहस्रेण चक्रवर्तित्वम्
c. लक्षपद्मैः जम्बूद्वीपाधिपत्यं

d. दशलक्षैः इन्द्रत्वम्
e. कोटिभिः कृत पद्मार्चनया फलं वक्तुमशक्यमिति निगदितं

4. पञ्चगोचर प्रतिष्ठाविधिः अपि एकोविशेष: महेश्वर, विष्णु, दुर्गा, विनायक, स्कन्दमूर्तय:, पञ्चगोचरत्वेन प्रतिपादिताः.
5. आत्मार्थ यजन विधिपटले विशेषतया आशौचादिष्वपि शिवयजनं कर्तव्यत्वेन, अंतर्याग, भस्मस्नान विशेषाश्च प्रतिप्रदिता:।
6. कल्याण विधि पटले शिव कल्याणं, सर्व कल्याणं, प्रथमिति तत्तद्वर्णानाम् नाम् विशेष फलदायक मित्युक्ता तत्तन्म तैस्साकं क्रिया प्रतिपादनं चोक्तम् ।

**उपसंहार**

एवं बहुषु अम्शेषु परिशीलितेषु, केवलं अम्शुमदाख्ये अस्मिन् ग्रंथे एतावंत: महत्वभूत्वा अंशा: दृश्यन्ते किमुत अन्येषु सिद्धान्त शैवागम सम्बधेषु अमुद्रितेषु ग्रंथेषु इतोपि बहूनां अम्शानाम् परिशीलनेन फलविषये किमुवक्तव्यं ।

अत: अमुद्रित ग्रंथाणाम् अद्ध्ययनेन तत्रत्य विशयाणाम् बहिरुद्घाटनेन अवश्यं अत्यन्तं लोकोपकार: संभवतीति मे विश्वासः इत्येवं आशास्य विरमामि विस्तरात् ।

**ग्रन्थ सूची**


1. अम्शुमदागम: (अमुद्रित ग्रन्थ:, TO 889 - तालपत्र संख्या)
2. अंशुमदागमः Manuscript No-T0889 Indological Reaserch Institute, Pondicherry.
3. अंशुमदागमः Manuscript No-T0004, Indological Reaserch Institute, Pondicherry.
4. अंशुमदागमः Manuscript No-T1070, Indological, Reaserch Institute, Pondicherry.
5. अंशुमदागमः Manuscript No-T0132, Indological Reaserch Institute, Pondicherry.
6. अंशुमदागमः Manuscript No-T0136, Indological Reaserch Institute, Pondicherry .
7. अंशुमदागमः Manuscript No-T0247b, Indological Reaserch Institute, Pondicherry.